# संशयादिपदार्थविश्लेषणम्

शिवप्रसादो न्यौपानेः
उपप्राध्यापकः, न्यायविभागः,
जनताविद्यापीठम्
ने.सं.वि, दाङः, नेपालः
neupaneshiv99@gmail.com

*(**सारसङ्क्षेपः** न्यायदर्शनस्य प्रतिपादको महर्षिगौतमोऽस्ति। न्यायदर्शने विशेषतो ग्रन्थकारेण निःश्रेयसप्राप्तिमार्गः प्रदर्शितो विद्यते। न्यायदर्शनानुसारं पदार्थानां तत्त्वज्ञानेनैव मोक्षप्राप्तिर्भवति। प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानं यथार्थज्ञानं वा मोक्षस्य मूलमार्गो विद्यते । अतोऽयमालेखः पदार्थानां मध्ये संशयादिपदार्थानां प्रमाणप्रमेयाभ्यां पृथगुपदेशः कारणत्वप्रतिपादने, एतेषां लक्षणविश्लेषणे च केन्द्रितो विद्यते । अस्मिन्नालेखे सर्वप्रथमं न्यायाभिमतप्रमाणप्रमेययोः स्वरूपनिदर्शनपूर्वकं संशयादिपदार्थस्वरूपविश्लेषणं क्रियते । प्रमाकरणरूपाणां प्रमाणानां सहयोगितया तदङ्गरूपेण संशयादिपदार्थानामप्यन्तरभावस्य कर्तुं शक्यत्वात्, अथवा प्रमायाः विषयबोधेषु प्रमेयेषु मध्ये सर्वमपि संशयादिपदार्थजातमन्तर्भूतं भवत्येवेति, कुतः पृथक्तया सूत्रकारेणोद्देशः कृतः ? इति समस्यायाः समाधानार्थमयं प्रयत्नो वर्तते । सकारणसंशयादिपदार्थोपदेशप्रतिपादनेन एतेषां स्वरूपस्य सम्यक्तया विश्लेषणमत्र विहितमस्ति । अन्ते चैतेषां प्रमाणप्रमेयादिभ्यः पृथगुपद्देशस्य कारणत्वं प्रदर्श्य निष्कर्षः प्रदत्तो विद्यते । अस्मान्निकर्षान्न्यायनिर्दिष्टानां षोडशपदार्थानामध्ययनाध्यापनाय सारल्यं भवितेत्यपेक्षते ।)*

**विशेषशब्दाः** पदार्थः, संशयः, प्रेत्यभावः, हेत्वाभावः, निग्रहस्थानम् ।

## १. विषयप्रवेश

वैदिकदर्शनेषु न्यायदर्शनस्य विशिष्टस्थानं वर्तते । न्यायविद्या, आन्वीक्षिकीविद्या, तर्कशास्त्रमिति न्यायदर्शनस्यैवापरं नाम । दर्शनस्यास्य समेषां दर्शनानामिव मुख्योद्देश्यं प्रयोजनं वा मोक्षप्राप्तिरेव । मोक्षप्राप्त्यर्थं यथार्थज्ञानस्यावश्यकता भवति । अपवर्गप्राप्तिनिमित्त्यर्थं यथार्थज्ञानस्यावश्यकता वर्तते । यथार्थज्ञानञ्च कस्य ? इति प्रश्ने पदार्थस्यैव किल वक्तव्यम् । पदस्य अर्थः=पदार्थः इति व्युत्पत्त्यनुसारेण पदार्थशब्दस्याभिधेयत्वमित्यर्थोऽवगम्यते । वैशेषिकदर्शने द्रव्यगुणकर्मसामान्यविशेषसमवायरूपेण षड्विधपदार्थाः स्वीकृता महर्षिकणादेन । अनेनाभावस्य पदार्थत्वं सूत्ररीत्या नाङ्गीकृतं दृश्यते । अनन्तरकालिकैराचार्यैरभावमप्यादाय सप्तविधपदार्थाः परिगणिता इति ज्ञेयम् । एतेन वैशेषिकसम्मताः सप्तविधपदार्था एवेति स्पष्टतया ज्ञातुं शक्यते । न्यायशास्त्रे न्यायसूत्रकारेण गौतमेन षोडशपदार्थाः स्वीकृताः सन्ति । प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानमेव निःश्रेयसकारणम् । अध्यायपञ्चकेन विभक्तोऽयं

सूत्रग्रन्थः प्रत्यध्यायं द्वे आह्निके स्तः । सर्वमाहत्य दशाह्निकैर्विभक्तोऽयं न्यायसूत्रग्रन्थः । आलेखेऽस्मिन् विशेषतः न्यायप्रथमसूत्रे प्रमाणप्रमेयादिभ्यः संशयादिपदार्थानां पृथक्तया कथनस्य कारणत्वप्रदर्शनपूर्वकं स्वरूपविश्लेषणञ्च विहितमस्ति । तत्र प्रमाणानामङ्गतया संशयादीनामपि स्वतः परिगणनस्य कर्तुं शक्यत्वात्, कुतः तेषां पृथगुपदेशः ? अथवा सर्वमपि वस्तुजातं प्रमेयान्तर्भूतं भवतीति संशयादीनामपि प्रमेयान्तर्गतत्वं सिद्ध्यतीति, कुतः पृथगुद्देशः ? इत्यादिसमस्यानां समाधानमत्र करिष्यते ।

## २. अध्ययनविधिः

आलेखेऽस्मिन् आवश्यकसामग्रीणां सङ्कलनार्थं मुख्यरूपेण पुस्तकालयीयाध्यायनविधेरवलम्बनं कृतं विद्यते । संशयादिपदार्थानां विवेचनक्रमे पुस्तकालयात् विविधसामग्रिसङ्कलनं कृत्वा विषयान्वेषणं कृतं वर्तते । अस्मिन् अनुसन्धानात्मकालेखे षोडशपदार्थप्रतिपादनपराः संस्कृतमूलाकरग्रन्थाः मुख्यसामग्रीत्वेन गृहीताः । नेपालीहिन्द्यादिभाषायां लिखिता अनूदिताश्च ग्रन्था द्वितीयसामग्रीत्वेन प्रयुक्ता वर्तन्ते ।

## ३. अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

न्यायदर्शनोक्तप्रमाणप्रमेययोः सामान्यपरिचयपूर्वकं संशयादिपदार्थानां विश्लेषणं विस्तृततया अस्तीत्यस्यानुसन्धानात्मकालेखस्य मूलं क्षेत्रं सीमा च विद्यते ।

## ४. सैद्धान्तिकाधारः

अनुसन्धानेऽस्मिन् प्रमाणप्रमेयपदार्थयोः सङ्क्षेपेण परिचयपुरस्सरं संशयादिपदार्थानां विश्लेषणं कृतं वर्तते । षोडशपदार्थेषु संशयादिपदार्थानां पृथगुपदेशस्य किं प्रयोजनमिति विषये लेखोऽयं केन्द्रितोऽस्ति । षोडशपदार्थविषयकाः न्यायगतसंस्कृतमूलाकरा ग्रन्थाः सैद्धान्तिकाधारत्वेनात्र स्वीकृता वर्तन्ते । न्यायसूत्रम्, न्यायभाष्यम्, न्यायवार्तिकम्, तर्कभाषा, तर्कसङ्ग्रहः, न्यायपरिचयः, न्यायसिद्धान्तमुक्तावली, न्यायमञ्जरी चेत्यादिग्रन्था विशेषतोऽत्रालेखे सैद्धान्तिकाधारत्वेन स्वीकृता वर्तन्ते । एतादृशसैद्धान्तिकाधारं स्वीकृत्य लिखितेऽस्मिनालेखे व्यवस्थितरूपेणानुसन्धानस्वरूपनिर्माणार्थं प्रचलिताया आधुनिकपद्धतेः प्रयोगः कृतो वर्तते ।

## ५. पदार्थविवेचनम्

प्रमाणप्रमेयादिषोडशपदार्थानां विस्तृततया विवेचनं गौतमर्षिणा न्यायसूत्रे कृतं वर्तते । तद्यथा- "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानाद् निःश्रेयसाधिगमः" (न्यायसूत्रम्, १।१।१) इति । एतस्मिन् सूत्रे सूत्रकारेण षोडशपदार्थानां तत्त्वज्ञानानन्तरं निःश्रेयसप्राप्तिर्भवतीत्युद्घोषितं परन्त्वत्र जगति षोडशपदार्था एव सन्ति, न ततो न्यूनाः, तदधिका वेति पदार्थसंख्यानिर्धारणं न क्रियते । संख्याविषयिणी चर्चा कुत्रापि न विहिता । तत्र अपवर्गप्राप्तिनिमित्तकावश्यकीभूतानां पदार्थानामेव चर्चा वर्तते । एवंरीत्या वैशेषिकदार्शनिकाः सप्तपदार्थान् स्वीकुर्वन्ति, नैयायिकाश्च षोडशपदार्थान् स्वीकुर्वन्ति परन्तु न्यायोक्तषोडशपदार्था

वैशेषिकोक्तसप्तपदार्थेष्वन्तर्भवन्त्येव । अत एव नैयायिकानां षोडशपदार्थाः, वैशेषिकानां सप्तपदार्थाः समाना एवेति । इदानीन्तावन्न्यायाभिमतप्रमाणप्रमेयपरिचयपुरस्सरं विशेषतः संशयादिपदार्थानां विश्लेषणं क्रियते ।

**प्रमाणम्**

प्रमीयते अनेनेति प्रमाणम्, प्रमासाधनं वा प्रमाणमिति । 'प्र'उपसर्गपूर्वकं 'माङ्' माने धातोः प्रमाणशब्दो निष्पद्यते । अत्र यः ज्ञानं करोति, सः प्रमाता । ज्ञानविषयः प्रमेयम् । तद्विषयकं ज्ञानं प्रमितिः । ज्ञानसाधनञ्च प्रमाणमिति । अतः येन माध्यमेन प्रमाता प्रमेयपदार्थस्य ज्ञानं करोति, तत्साधनमेव प्रमाणशब्देन व्यवह्रियते । उक्तञ्च भाष्यकारेण- "यस्येप्साजिहासाप्रयुक्तस्य प्रवृत्तिः सः प्रमाता, स येनार्थं प्रमिणोति तत्प्रमाणम्, योऽर्थः प्रमीयते तत्प्रमेयम्, यदर्थविज्ञानं सा प्रमितिः" (वात्स्यायनः, खैष्टाब्दम् १९९९, ४) इति । प्रमाणं विना प्रमेयोत्पत्तिरसम्भवः । यस्य कस्यापि पदार्थस्य यथार्थज्ञानाय प्रमाणस्यावश्यकता भवतीत्यतो न्यायसूत्रे सर्वप्रथमं प्रमाणपदार्थो निरूपितो गौतमेन । प्रमाणपदार्थद्वारैव प्रमेयसंशयप्रयोजनादिपदार्थज्ञानमुत्पद्यते । एतदेवोक्तं भाष्यकारेण यत्- "प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम्" (वात्स्यायनः, खैष्टाब्दम् १९९९, ३) इति । जयन्तभट्टानुसारेण तु येनासन्दिग्धं निश्चितज्ञानञ्चोत्पद्यते, तत्प्रमाणमिति । यथोक्तम्- "अव्यभिचारिणीमसन्दिग्धामर्थोपलब्धिं विदधती बोधाबोधस्वभावा सामग्री प्रमाणम्" (भट्टः, २०७४, २०) इति । प्रमाणसंख्याविषये यद्यपि मतभेदो वर्तते, तथापि प्रमाणस्वीकारविषये सर्वेषां दार्शनिकानां मतैक्यं दरीदृश्यते । न्यायदर्शने चत्वारि प्रमाणानि स्वीकृतानि । तानि च प्रत्यक्षानुमानोपमानशब्दादीनि । न्यायसूत्रेऽप्युक्तम्- "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" (न्यायसूत्रम्, १।१।३) इति ।

प्रत्यक्षज्ञानस्य करणं प्रत्यक्षप्रमाणं भवति । घटादिप्रत्यक्षज्ञाने चक्षुरादीनां करणत्वात्तेषां प्रत्यक्षप्रमाणत्वमिति ज्ञेयम् । प्रत्यक्षप्रमाणेन यज्ज्ञानमुत्पद्यते तत्प्रत्यक्षज्ञानमुच्यते । प्रत्यक्षन्तु इन्द्रियजन्यं ज्ञानम् । तर्कभाषाकारमते "साक्षात्कारिणी च प्रमा, सा एवोच्यते या इन्द्रियजा" (मिश्रः, २०६०, ३३) इति । तच्च साक्षात्कारिणी प्रमा द्विधा विभज्यते सविकल्पकं निर्विकल्पकञ्चेति । तत्र नामजात्यादिरहितं ज्ञानं निर्विकल्पकम् । एवञ्च नामजात्यादिसहितं ज्ञानं सविकल्पकमिति । गौतममते इन्द्रियाणामर्थाणाञ्च सम्बन्धेन यज्ज्ञानमुत्पद्यते, तज्ज्ञानं प्रत्यक्षज्ञानं भवति । घ्राणरसनचक्षुस्त्वक्श्रोत्रणीन्द्रियाणि । केवलमिन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षन्न भवति, अपितु यज्ज्ञानमिन्द्रियार्थसन्निकर्षोत्पन्नत्वे सत्यव्यपदेश्यम्, अव्यभिचारि, व्यवसायात्मकं भवति, तदेव ज्ञानं प्रत्यक्षम् । न्यायसूत्रेऽप्युक्तम्- "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" (न्यायसूत्रम्, १।१।४) इति ।

अनूपसर्गपूर्वकं माधातोरनुमानशब्दो निष्पद्यते । अनु=पश्चात्, कस्मात् पश्चात् ? प्रत्यक्षपश्चादिति । अनुमानं प्रत्यक्षपूर्वकमेव भवति । सूत्रकारेणाप्युक्तम्- "अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्, सामान्यतोदृष्टञ्च" (न्यायसूत्रम्, १।१।५) इति । तत्पूर्वकमित्यत्र तच्छब्दस्य प्रत्यक्षार्थः । न्यायशास्त्रेऽनुमानप्रमाणाव्यवहितपूर्वकाले प्रत्यक्षप्रमाणस्य निरूपणं कृतं विद्यते ग्रन्थकारेण, अत एव तच्छब्देन प्रत्यक्षप्रमाणमेवेति ज्ञातव्यम् । अनुमानप्रमाणेन यज्ज्ञानमुत्पद्यते, तज्ज्ञानमनुमितिः । अनुमितेः

करणमनुमानम् । तर्कसङ्ग्रहेऽप्युक्तम्- “अनुमितिकरणमनुमानम्” (भट्टः, खैष्टाब्दम् १९८५, ३९) इति । न्यायसूत्रकारेण गौतमेन पूर्ववत्, शेषवत्, सामान्यतोदृष्टञ्चेति अनुमानस्य त्रैविध्यं विवेचितम् । यत्र कारणेन कार्यानुमानं भवति तत्पूर्ववदनुमानम् । यथा मेघोन्नतिं दृष्ट्वा वृष्टिर्भविष्यतीत्यनुमानम् । यत्र कार्येण कारणानुमानं भवति तच्छेषवदनुमानम् । यथा पर्वतो वह्निमान् धूमादित्यत्र धूमेन कार्येण वह्नेः कारणस्यानुमानमिति । अन्यत्र दृष्टस्यान्यत्र दर्शनेन यदनुमानं भवति, तत्सामान्यतोदृष्टानुमानम् । यथा प्रातःकाले प्राच्यां दृष्टस्य रवेः यत्सायंकाले प्रतीच्यां दर्शनमिति । तेन रविगतेरनुमानं भवति, तच्च सामान्यतोदृष्टानुमानमिति ।

न्यायदर्शने तृतीयप्रमाणरूपेणोपमानप्रमाणस्य चर्चा विद्यते । उपमीयते अनेनेत्युपमानमिति व्युत्पत्त्या सादृश्येन यज्ज्ञानं भवति, तदुपमितिः । उपमितिकरणञ्चोपमानम् । उपमानप्रमाणलक्षणन्तु- “प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्” (न्यायसूत्रम्, १।१।६) इति । प्रसिद्धसाधर्म्येन युक्तेन साध्यस्य साधनमुपमानमिति । उपमानप्रमाणेन उपमित्युपत्तिर्भवति । अत उपमित्यर्थमुपमानं कारणं भवति । उपमितेः करणमसाधारणकारणं वोपमानम् । संज्ञासंज्ञिसम्बन्धज्ञानं, पदपदार्थसम्बन्धज्ञानं वोपमितिः । “पूर्वानुभूतस्य पदार्थस्य सादृश्येन यत्र कश्चन नवीनपदार्थस्य ज्ञानं भवति, तज्ज्ञानमुपमितिः” (मिश्रः, खैष्टाब्दम् २०१६, ४०४) इति । गोसदृशो गवयो भवतीति श्रुत्वा कश्चनः ग्रामीणपुरुषः किञ्चित्कालानन्तरमरण्यं गच्छति । तत्रारण्ये सः पुरुषः गोसदृशं गवयपिण्डं पश्यति, तदनन्तरं गोसदृशो गवय इत्यतिदेशवाक्यार्थं स्मरति । तत्पश्चाद् गोसादृश्यविशिष्टपिण्डज्ञानं भवति । तदेव ज्ञानमुपमितिः । एवञ्चायमसौ गवयशब्दवाच्य इत्युपमितिर्जन्यते । न्यायमञ्जरीकारमते तु- “संज्ञासंज्ञीसम्बन्धप्रतीतिफलं प्रसिद्धेतरयोः सारूप्यप्रतिपादकमतिदेशवाक्यमेवोपमानम्” (भट्टः, २०७४, २०५) इति ।

नैयायिकैः शब्दाख्यं चतुर्थं प्रमाणं स्वीक्रियते । “आप्तोपदेशः शब्दः” (न्यायसूत्रम्, १।१।७) इति शब्दलक्षणम् । आप्तपुरुषस्योपदेशः शब्दः । आप्तस्य=यथार्थज्ञानवतः पुरुषस्य य उपदेशः, स शब्दाख्यं प्रमाणमस्तीत्यर्थः । “आप्तस्तु यथाभूतस्यार्थस्योपदेष्टा पुरुषः” (मिश्रः, २०६०, ८७) इति । शब्दप्रमाणेन शाब्दज्ञानमुत्पद्यते । शाब्दबोधार्थं पदज्ञानं करणं, पदार्थज्ञानं व्यापारः, शक्तिज्ञानञ्च सहकारिकारणं भवति । “पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः । शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी” (भट्टाचार्यः, २०७५, ८१) इति ।

## प्रमेयम्

न्यायदर्शने महर्षिगौतमेन प्रथमसूत्रे प्रमाणानन्तरं प्रमेयपदार्थस्य चर्चा विहिता । प्रमाणेन यस्य पदार्थस्य यथार्थज्ञानं भवति, सः पदार्थ एव प्रमेयमिति । प्रमेयन्नाम ज्ञानविषयम् । प्रमाणेन ज्ञेयं वस्तु प्रमेयं भवति । प्रमाणं विना प्रमेयसिद्धिरसम्भवोऽस्ति । अत एव न्यायसूत्रे प्रमाणानन्तरमेव प्रमेयपदार्थस्य वर्णनं कृतं सूत्रकारेण । अस्मिन् लोके सर्वे पदार्थाः प्रमेयेऽन्तर्भवन्त्येव, तथापि न्यायदार्शनिकैर्निःश्रेयसफलसाधनाय अवश्यज्ञेयानि प्रमेयाणि न्यायसूत्रे उल्लिखितानि । “मुमुक्षुभिः प्रमाणेन प्रमेयपदार्थस्य ज्ञानमवश्यं कर्तव्यम् । अतः

प्रकृष्टः=सर्वश्रेष्ठः, मेयम्=ज्ञेयमिति, तदेव प्रमेयपदस्यार्थः" (तर्कवागीशः, खैष्टाब्दम् २०१४, १९४) इति। तच्च प्रमेयं द्वादशविधं भवति। यथोक्तं सूत्रकारेण- "आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" (न्यायसूत्रम्, १।१।९) इति । आत्मा, शरीरम्, इन्द्रियाणि, अर्थाः, बुद्धिः, मनः, प्रवृत्तिः, दोषाः, प्रेत्यभावः, फलम्, दुःखम्, अपवर्ग एतानि प्रमेयाणि सन्ति । संशयादिपदार्थविश्लेषणपरकेऽस्मिन्नालेखे प्रमेयादीनां प्रत्येकं विश्लेषणमनुयुक्तमिति। इतः परं तदारभ्यते ।

## ६. संशयादीनां पृथगुपदेशकारणत्वोपपादनम्

महर्षिगौतमेन न्यायदर्शनस्य प्रथमसूत्रे सर्वप्रथमं प्रमाणपदार्थस्य, अनन्तरं प्रमेयपदार्थस्य विवेचनं कृतम् । तत्पश्चादेव तृतीयपदार्थतया संशयस्य विवेचनं विश्लेषणञ्च कृतं वर्तते । संशयादिपदार्थाः प्रमाणप्रमेयेष्वेवान्तर्भवन्ति । तेषां पृथगुपदेशो नावश्यकः । प्रमाणप्रमेयातिरिक्तसंशयादिपदार्थानां पृथगुपदेशः किमर्थम् ? इति प्रश्ने तत्रोच्यते - यद्यपि संशयादिपदार्थान् प्रमाणप्रमेयेष्वन्तर्भावं कर्तुं शक्यते, तथापि तेषां पदार्थानां विशेषप्रयोजनप्रदर्शनाय बोधनाय च ग्रन्थकारेण पृथगुपदेशः कृतः । विशेषप्रयोजनन्त्वेवम्- विद्याचतुष्टये आन्वीक्षिकी, न्यायविद्या अन्यतमा। संशयादिपदार्थानां पृथगुपदेशं विनेयं न्यायविद्याऽप्यध्यात्मविद्येव प्रतिभाति । यतोहि न्यायविद्यायाः विषयस्तु केवलं संशयितार्थः । संशयमन्तरेण न्यायशास्त्रस्य प्रवृत्तिर्न भवति। अनुपलब्धे निर्णीते चार्थे न्यायो न प्रवर्तते, केवलं संशयितेऽर्थे न्यायः प्रवर्तते। अत एवाध्यात्मशास्त्रात् पृथक् न्यायशास्त्रमिति बोधनाय संशयस्य पृथगुपदेशः सार्थक एव, न तु व्यर्थः । एवंप्रकारेण प्रयोजनपदार्थादीनामपि न्यायविद्याया अध्यात्मविद्यातो विशेषप्रतिपादनार्थमनुमानापरपर्यायन्यायस्य सहयोगितया प्रयोजनादीनामप्यत्यन्तमावश्यकत्वेन पृथक्कथनं समुचितमेव भवति। इतः परं संशयादीनामेतेषां सर्वेषां क्रमशो विश्लेषणं क्रियते ।

### क. संशयः

संशयलक्षणन्तु- "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरूपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः" (न्यायसूत्रम्, १।१।२३) इति । समानधर्मोपपत्तेः, अनेकधर्मोपपत्तेः, विप्रतिपत्तेः, उपलब्ध्यव्यवस्थातः, अनुपलब्ध्यव्यवस्थातश्च संशयो भवति । तद्यथा, रात्रिकाले/अन्धकारे वा किञ्चिद्दूराद् किञ्चन वस्तु दृष्ट्वा अयं स्थाणुर्वा पुरुषो वेति संशयो जायते। स्थाणुपुरुषयोः आरोहपरिणाहादिसमानधर्मं दृष्ट्वा स्थाणुर्वा पुरुषो वेति विशेषधर्मजिज्ञासा जायते। अतः समानधर्मोपलब्धिः संशयाय वर्तते। पृथिव्यामनेकधर्मदर्शनादपि संशयो जायते। अनेकन्नाम समानजातीयमसमानजातीयञ्च। पृथिवी गन्धवत्वात् सजातीयेभ्यो जलादिभ्यो विशिष्यते । एवञ्चासमानजातीयेभ्यो गुणकर्मभ्यश्च विशिष्यतेऽतोऽत्र संशयो जायते । एकस्मिन्नेवात्मनि विषये अस्त्यात्मा, नास्त्यात्मेति विप्रतिपत्तिर्दृश्यते। सदसद्भाव एकत्र न सम्भवति। अत्रात्माऽस्ति न वेति विशेषसंशयो जायते। एवं तडागादौ जलमस्ति उपलभ्यते च, मरीचिषु जलं नास्ति परन्तु भानं भवति। क्वचित्स्थले सदुपलभ्यते, क्वचित्स्थलेऽसदुपलभ्यते। अत उभयज्ञानवतः क्वचिज्जलप्रतीतौ जातायां सोपलब्धिः जलस्य सदसद्विषये संशयं जनयति । अनुपलब्ध्यव्यवस्थाऽपि संशयप्रवर्तिका । सदपि जलं वस्त्राच्छादिते

सति नोपलभ्यते। असत्तु कथं दृश्यते ? अतः किं सत् नोपलभ्यते, असत् नोपलभ्यते वेति संशयोऽत्र जायते। क्वचिन्मते तु संशयः त्रिविधः- समानधर्मदर्शनजः, विप्रतिपत्तिजः, असाधारणजश्चेति। यथोक्तम् - "एकस्मिन् धर्मिणि विरुद्धनानार्थावमर्शः संशयः, स च त्रिविधः। विशेषादर्शने सति समानधर्मदर्शनजः, विप्रतिपत्तिजः, असाधारणधर्मजश्चेति" (मिश्रः, २०६०, १९६) इति।

**ख. प्रयोजनम्**

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तत इति प्रसिद्धवचनमस्ति। प्रयोजनं विना कोऽपि कुत्रापि न प्रवर्तते। प्रयोजनमन्तरेण न्यायशास्त्रस्यापि प्रवृत्तिर्न भवति। उक्तञ्च भाष्यकारेण- "यमर्थमभीप्सन् जिहासन् वा कर्मारभते, तेनानेन सर्वे प्राणिनः, सर्वाणि कर्माणि, सर्वाश्च विद्या व्याप्ताः, तदाश्रयश्च न्यायः प्रवर्तते" (वात्स्यायनः, खैष्टाब्दम् १९९९, ६) इति। यमर्थमुद्दिश्य पुरुषः प्रवर्तते, तत्प्रयोजनम्। "यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम्" (न्यायसूत्रम्, १।१।२४) इति प्रयोजनलक्षणम्। अयमर्थः आप्तव्यः, अयमर्थो हातव्य इति निश्चित्य प्राप्तये हानाय वा पुरुषः प्रयतते, तत्प्रयोजनमिति। "इदं सुखसाधनमिति ज्ञात्वा सुखाप्तये प्रयतते, इदं दुःखसाधनमिति चाधिगम्य दुःखहानायेति। सुखदुःखयोरवाप्तिहानाभ्यामयं लोकः प्रयुज्यत इति सुखदुःखाप्तिहानी प्रयोजनमिति। अनेन च प्रयोजनेन सर्वेऽर्थाः सङ्गृहीता भवन्ति" (उद्योतकरः, २०६४, १०१-१०२) इति।

**ग. दृष्टान्तः**

प्रतिज्ञादिपञ्चावयववाक्येषु दृष्टान्तबोधकोदाहरणवाक्यस्य प्रयोगो भवति। उदाहरणवाक्यं दृष्टान्तं विना न सम्भवति। अनुमानागमौ दृष्टान्ताधीनौ। दृष्टान्ते सति स्यातां दृष्टान्तेऽसति च न स्यातामनुमानागमौ। "लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः" (न्यायसूत्रम्, १।१।२५) इति न्यायसूत्रे दृष्टान्तलक्षणम्। यस्मिन् पदार्थे लौकिकपरीक्षकपुरुषयोः बुद्धिसाम्यं वर्तते, यस्मिन् पदार्थे च द्वयोः पुरुषयोर्बुद्धिवैषम्यं नास्ति, स पदार्थो दृष्टान्तो भवति।

**घ. सिद्धान्तः**

न्यायदर्शने दृष्टान्तनिरूणानन्तरं सिद्धान्तनिरूपणं क्रियते। तच्च "तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः" (न्यायसूत्रम्, १।१।२६) इति। 'इदमित्थम्भूतम्' इत्याकारकेत्थम्भावव्यवस्था सिद्धान्तः। इदमित्थम्भूतं चेति भाष्यम्। इदमिति सामान्यतोऽवगममाह। इत्थम्भूतं चेति विशेषः। एतदुक्तम्भवति- "सामान्यविशेषवदर्थाभ्यनुज्ञा सिद्धान्त इति" (उद्योतकरः, २०६४, १०३) तन्त्रैः = शास्त्रैः, अधिकरणैः, अभ्युपगमैः सिद्धान्तानाम् अर्थानां सम्यग् व्यवस्था एव सिद्धान्तः। सर्वतन्त्र-प्रतितन्त्र-अधिकरणसंस्थिति-अभ्युपगमसंस्थितिभेदेन सिद्धान्तश्चतुर्विधः। यथोक्तम्- स चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् (१।१।२७) इति। तत्र सर्वशास्त्रेषु येऽर्थाः समानतया प्रस्तुताः, ते "सर्वतन्त्रसिद्धान्तशब्देन व्यवह्रियन्ते। सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थ सर्वतन्त्रसिद्धान्तः" (१।१।२८) इति। यथा इन्द्रियाणि घ्राणादीनि, तदर्थाः गन्धादयः, पृथिव्यादीनि भूतानीति। येऽर्थाः समानतन्त्रेषु सिद्धाः परन्तु

परतन्त्रेष्वसिद्धाः, ते प्रतितन्त्रसिद्धान्तशब्देन व्यवह्रियन्ते । यथा नासतः । असतः उपलब्धिः(उत्पत्तिः), न सतो नाश इति सांख्यतन्त्रसिद्धान्तः । असत उत्पत्तिः, सतो जगत्कार्यस्य नाश इति न्यायवैशेषिकौ स्वीकुरुतः । "यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः" (न्यायसूत्रम्, १।१।३०) देहेन्द्रियाद्यतिरिक्तो ज्ञाता दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्युक्ते इन्द्रियाणां नानात्वं, नियतविषयत्वं, चेतनस्य गुणाधिकरणत्वम्, अनियतविषयत्वञ्चानुषङ्गतया सिद्ध्यन्ति। "योऽर्थः सूत्रेषु नोपनिबद्धः शास्त्रे चाभ्युपगतः सोऽभ्युपगमसिद्धान्तः" (उद्योतकरः, २०६४, १०५) इति । यथा शब्दः द्रव्यमस्तीत्युक्ते तदपरीक्ष्यैव स्वीकृत्य स नित्योऽनित्यो वेति विशेषपरीक्षैव अभ्युपगमसिद्धान्तः ।

**ङ. अवयवः**

"सोऽयं परमो न्यायः" (वात्स्यायनः, सन् १९९९, ८) इति भाष्यवचनात्, पञ्चावयववाक्यं हि परमो न्याय इति स्पष्टं भवति । पञ्चावयवात्मकानां न्यायवाक्यानामेकदेश एवावयवः । वाक्यानामेकदेशोऽवयवो वा । "प्रतिज्ञादीनां पञ्चानामवयवानां समुदायत्वं न्यायत्वमिति । न्यायत्वञ्च प्रतिज्ञाद्यवयवपञ्चकसमुदायत्वम् । अवयवत्वञ्च प्रतिज्ञाद्यन्यतमत्वम्" (त्रिपाठी, खैष्टाब्दम् १९८५, ४५) इति । अतः प्रतिज्ञादिवाक्यानामेकदेशोऽवयवः । नैयायिकैः पञ्चावयवाः स्वीक्रियन्ते । ते चावयवाः प्रतिज्ञाहेतूदाहरणोपनयनिगमनभेदेन पञ्च सन्ति । "प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः" (न्यायसूत्रम्, १/१/३२) इति । भाष्यकारेण वात्स्यायनेन न्यायभाष्ये दशावयवस्वीकुर्वतां नैयायिकैकदेशिनां मतं प्रस्तुत्य दशावयवेषु जिज्ञासासंशयशक्यप्राप्तिप्रयोजनसंशयव्युदासादीनां पञ्चावयवानां खण्डनं कृतमस्ति । "साध्यनिर्देशः प्रतिज्ञा" (न्यायसूत्रम्, १/१/३३) इति गौतमः । भाष्यकारमते तु प्रज्ञापनीयधर्मेण विशिष्टस्य धर्मिणो बोधवचनं प्रतिज्ञा । यथा पर्वतो वह्निमानिति । "उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः" (न्यायसूत्रम्, १/१/३४), "तथा वैधर्म्यात्" (न्यायसूत्रम्, १/१/३५) इति सूत्रानुसारं साधर्म्येण वैधर्म्येण च हेतुः साध्यस्यानुमापकं भवति । पर्वतो वह्निमान् धूमादित्यत्रधूमहेतुर्महानसादेः साधर्म्येण, जलह्रदादेर्वैधर्म्येण च वह्नेः साधकं भवति। महानसादौ धूमो विद्यते, वह्न्यपि विद्यतेऽतः धूमहेतुर्महानसादेः साधर्म्येण वह्नेरनुमापकं भवति । एवञ्च वह्निर्यत्र नोपलभ्यते, तत्र धूमोऽपि नोपलभ्यते । यथा जलह्रदादौवह्नेरूपलब्धिर्नास्ति, धूमस्याप्युपलब्धिर्नास्त्यतः जलह्रदादेर्वैधर्म्येण वह्नेरनुमापकं भवति ।

दृष्टान्तबोधकं वाक्यमुदाहरणं भवति । दृष्टान्त एव उदाहरणमिति संसूच्य "साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम्" (न्यायसूत्रम्, १/१/३६) इत्युदाहरणं प्रदर्शयति सूत्रकारः । साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्तः, साध्यस्य विपरीतधर्मतया साध्याधर्मभावी दृष्टान्तश्चोदाहरणं भवति । तथा च सूत्रम् "तद्विपर्ययाद्वा विपरीतम्" (न्यायसूत्रम्, १।१।३७) इति । यथा- पर्वतो वह्निमान् धूमादित्यत्र स्थले यो यो धूमवान् स स वह्निमान् महानसादिवदित्यत्र महानसदृष्टान्तेन धूमे वह्नेर्व्याप्तिं बोधयति। एवञ्च यो यो न वह्निमान् स स न धूमवान् यथा जलह्रद इत्यत्र जलह्रददृष्टान्तेन वह्न्यभावे धूमाभावस्य प्रतिपादनं भवति। पक्षे लिङ्गस्य उपसंहारवचनमेवोपनयः । उपनये उदाहरणस्यानुसरणं भवति । "उदाहरणापेक्षस्तथेत्युपसंहारो

न तथेति वा साध्यस्योपनयः” (न्यायसूत्रम्, १/१/३८) इति सूत्रम् । यथा अनित्यः शब्दः उत्पत्तिधर्मकत्वात् इत्यत्र यथा घट उत्पत्तिधर्मकत्वादनित्यः, तथैव अयं शब्दोऽप्युत्पत्तिधर्मकः । एवञ्चात्मादिद्रव्याणामनुत्पत्तिधर्मकत्वान्नित्यम्, शब्दस्तु न चानुत्पत्तिधर्मकः । उपनयानन्तरं तदनुसारेण उत्पत्तिधर्मकत्त्वादनित्यः शब्द इति निश्चीयते (निगम्यते) । इदमेव निगमनमिति । एवंप्रकारेण प्रतिज्ञादिपञ्चावयववाक्यैः परार्थानुमाने साध्यसिद्धिं कुर्वन्ति नैयायिकाः ।

**च. तर्कः**

व्याप्यारोपेण व्यापकारोपस्तर्क इति तर्कस्य लक्षणम् । स च प्रमाणानामनुग्राहकः । यथा धूमोऽग्निव्याप्यः । एवमग्निर्धूमव्यापकः । सूत्रञ्च- “अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः” (न्यायसूत्रम्, १।१।४०) इति । अज्ञातेऽर्थे जिज्ञासोत्पद्यते । तदनन्तरं जिज्ञासिते वस्तुनि विरुद्धौ धर्मौ विमर्शविषयौ भवतः । विमृश्यमानयोः धर्मयोरन्यतरकारणोपपत्त्या अनुजानाति । एवं प्रमाणानां साहाय्येन तत्त्वज्ञानार्थमुहस्तर्को भवति । योऽयं ज्ञाता आत्मरूपोऽस्ति, स किमुत्पत्तिधर्मकः ? आहोस्विदनुत्पत्तिधर्मकः ? इति जिज्ञासायां यद्यसौ ज्ञातोत्पत्तिधर्मकस्तदा तेन स्वकृतस्य कर्मणः फलभोगं न कुर्यात् । एवंप्रकारेण क्रियमाण उह एव तर्क इति ।

**छ. निर्णयः**

“विमृश्यपक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः” (न्यायसूत्रम्, १।१।४१) इति निर्णयलक्षणम् । तत्त्वस्यावधारणं निर्णयः । योऽवयवतर्काभ्यां सिद्ध्यति, सः निर्णयः । विमृश्य=संशय्य, संशयानन्तरं वादिप्रतिवादिभ्यां स्वपक्षस्थापनं परपक्षखण्डनं च क्रियते, तदनन्तरं मध्यस्थेन एकार्थनिश्चयः=अर्थावधारणं च क्रियते, स एव निर्णयः । विमृश्यैव पक्षप्रतिपक्षाभ्यामर्थनिश्चयो भवति । विमृश्य एव पक्षप्रतिपक्षौ उद्दीप्य न्यायं प्रवर्तयति । पक्षप्रतिपक्षाभ्याम्-पक्षशब्देन पक्षविषयः साधनमित्युच्यते । “प्रतिपक्षशब्देन पक्षविषयस्य साधनस्योपालम्भः ताभ्यां साधनोपालम्भाभ्यां यदर्थावधारणं स निर्णयः” (उद्योतकरः, २०६४, १४३) इति वार्तिककारमतम् । केशवमिश्रमते निर्णयस्त्ववधारणज्ञानम्, तदभावाप्रकारकतत्प्रकारकं ज्ञानं निर्णयः, स च तर्कसहकृतप्रमाणानां फलमस्ति । “निर्णयोऽवधारणज्ञानम् । तच्च प्रमाणानां फलम्” (मिश्रः, २०६०, २०३) इति ।

**ज. वादः**

षोडशपदार्थेषु दशमपदार्थत्वेन वादः प्रतिपादितः । न्यायशास्त्रे वादजल्पवितण्डानां कृते कथाशब्दस्य प्रयोगः क्रियते । “तिस्रः कथा भवन्ति- वादः, जल्पः, वितण्डा चेति” (वात्स्यायनः, खैष्टाब्दम् १९९९, ४८) । तत्र त्रिषु कथास्वन्यतमा कथा वादोऽस्ति । तत्त्वजिज्ञासूनां गुरुशिष्याणां मध्ये जायमाना कथैव वादो भवति । अत एव तत्त्वनिर्णये वाद उपयुज्यते । सूत्रञ्च “प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः” (न्यायसूत्रम्, १।२।१) इति । एकविषयकौ यौ विरुद्धौ धर्मौ तौ प्रतिपक्षौ इत्युच्यते । परस्परविरुद्धत्वात् पक्षस्य विरुद्धः प्रतिपक्ष इत्यर्थः । अत्र वादे पक्षस्य प्रतिपक्षस्य

च स्वीकारो भवति । अस्त्यात्मा, नास्त्यात्मेति पक्षप्रतिपक्षौ । एकस्यैवात्मनः परस्परविरुद्धयोर्भावाभावयोः प्रतिपादकत्वादेतादृशपक्षपतिपक्षयोः परिग्रहो वादः । तर्कभाषाकारस्तु- “तत्त्वबुभुत्स्वोः कथा वादः” (मिश्रः, २०६०, २०३) इति वदति । वादे वादे जायते तत्त्वबोध इति वचनानुसारेणापि वादकथाया मुख्यप्रयोजनं तत्त्वबोध एवेति निश्चिततया वक्तुं शक्यते ।

**झ. जल्पः**

त्रिषु कथासु द्वितीया कथाऽस्ति जल्पः । वाद एव जल्पो भवति, यदा छलजातिनिग्रहस्थानैः स्थापना प्रतिषेधश्च क्रियते । जल्पे वादकथाया अपि ग्रहणं भवति । वादकथायाः लक्षणं जल्पेऽपि आरोप्यते नैयायिकैः । “यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः” (न्यायसूत्रम्, १।२।२) इति सूत्रे यथोक्तोपपन्नेतिपदेन वादलक्षणोक्तः प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः, पञ्चावयवोपपन्नः, पक्षप्रतिपक्षपरिग्रहश्चेत्यनुगृह्यन्ते । अतो वादलक्षणोक्तछलजातिनिग्रहस्थानैर्यत्र स्थापनं प्रतिषेधश्च भवति, सा कथा जल्प इति । द्वयोर्विजिगीष्वोः उभयस्थापनावती कथा एव जल्पः । वादकथायां यद्यपि विजीगीषा न भवति, परन्तु जल्पकथाया मुख्यप्रयोजनमेव विजीगीषास्ति । “उभयसाधनवती विजिगीषुकथा जल्पः, स च यथासंभवं सर्वनिग्रहाणामधिकरणम्, परपक्षे दूषिते स्वपक्षस्थापनप्रयोगावसानश्च” (मिश्रः, २०६०, २०४) इति ।

**ञ. वितण्डा**

तृतीयकथारूपेण वितण्डायाः प्रयोगः क्रियते न्यायदर्शने । अस्यां कथायां पक्षप्रतिपक्षयोः स्थापना न भवति । प्रतिपक्षस्थापनरहिता कथा वितण्डा । “स प्रतिपक्षस्थापनाहीनो वितण्डा” (न्यायसूत्रम्, १।२।३) इति सूत्रेणैव जल्प एव किञ्चिद्विशेषणसम्बन्धेन वितण्डा भवतीति ज्ञाप्यते । सः=जल्पः, प्रतिपक्षहीनः सन् वितण्डा भवति । वैतण्डिकस्य मुख्यप्रयोजनमेव परपक्षखण्डनमस्ति । तेन वैतण्डिकेन स्वपक्षोपपादनं न क्रियते । केशवमिश्रमते त्वस्यां कथायां स्वपक्षस्थापना न भवति, केवलं परपक्षखण्डनं भवति, सैव कथा वितण्डा । तदुक्तम् “स एव स्वपक्षस्थापनाहीनो वितण्डा । सा च परपक्षदूषणमात्रपर्यवसाना” (मिश्रः, २०६०, २०४) इति ।

**ट. हेत्वाभासः**

हेतुवदाभासन्ते ये, ते हेत्वाभासा इति व्युत्पत्त्या हेत्वाभासपदेन दुष्टहेतव उच्यन्ते । एवञ्च हेतोराभासा- हेत्वाभासा इति व्युत्पत्त्या च हेत्वाभासपदेन हेतुदोषा उच्यन्ते । सद्हेतुत्वज्ञानमिवासद्हेतुत्व-ज्ञानमपि विजयप्रयोजकं भवत्यत एव सूत्रकारेण असद्हेतवोऽपि कथिताः । असद्हेतव एव हेत्वाभासपदेनोच्यन्ते । यदा हेतुः साध्यसाधनाय समर्थो भवति, तदा सद्हेतुरित्याख्यायते, अन्यथा तस्य दुष्टहेतुत्वमेव । नैयायिकाः पञ्चहेत्वाभासान् स्वीकुर्वन्ति । “सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता हेत्वाभासाः” (न्यायसूत्रम्, १।२।४) इति । कारिकावलीकारेण तदुल्लिखितम्- “अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः । कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा” (भट्टाचार्यः, २०७५, ७१) इति । तत्रैकत्राव्यवस्थितिर्व्यभिचारः । “अनैकान्तिकः

सव्यभिचारः" (न्यायसूत्रम्, १।२।५) यथा शब्दो नित्योऽस्पर्शत्वात्। स्पर्शवान् घटोऽनित्यः, न तथा स्पर्शवान् शब्दः। तस्मादस्पर्शत्वात् नित्यः शब्दः । अत्र अस्पर्शत्वहेतुर्व्यभिचारदोषयुक्तः । न्यायशास्त्रेऽनैकान्तिकहेत्वाभासस्य त्रैविध्यमुक्तम्- साधारणानैकान्तिकत्वम्, असाधारणानैकान्तिकत्वम्, अनुपसंहारित्वञ्चेति । एवञ्च "सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः" (न्यायसूत्रम्, १।२।६) इति विरुद्धहेत्वाभासलक्षणम् । यथा शब्दो नित्यः कार्यत्वात् । "यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः" (न्यायसूत्रम्, १।२।७) इति प्रकरणसमः । येन हेतुना प्रकरणचिन्ता भवति निर्णयार्थमपदिष्टः स एव हेतुः प्रकरणसमहेत्वाभासो भवति । यथाशब्दोऽनित्यः नित्यधर्मानुपलब्धेः । अत्र घटादिवदनुपलभ्यमाननित्यधर्मकमनित्यं दृष्टम् । एवञ्च शब्दो नित्योऽनित्यधर्मानुपलब्धेरित्यत्राकाशादिवदनुपलभ्यमानानित्यधर्मकं नित्यं दृष्टम् । एवंप्रकारेण "साध्याविशिष्टः साध्यत्वात् साध्यसमः" (न्यायसूत्रम् १।२।८) इति साध्यसमहेत्वाभासस्य लक्षणम्। द्रव्यं छाया गतिमत्त्वादित्यत्र गतिमत्त्वहेतुरपि साध्यवत् साधनीय एव भवति । साध्येनाविशिष्टो हेतुः साध्यसम इति हेत्वाभासो भवति । न्यायशास्त्रे पञ्चमो हेत्वाभासः कालातीतोऽस्ति । तत्र "कालात्ययापदिष्टः कालातीतः" (न्यायसूत्रम्, १।२।९) इति । यथा शब्दो नित्यः संयोगव्यङ्ग्यत्वाद् रूपवदिति । कालातीतस्यापरन्नाम बाधितः। यत्र प्रयोगे साध्याभाववान्पक्षो भवति, सः बाधितः । यथा उत्पत्तिकालीनघटो गन्धवान् पृथिवीत्वादिति । अत्र पक्ष उत्पत्तिकालीनघटः साध्याभाववानस्ति । यतोहि उत्पन्नं द्रव्यं क्षणं निर्गुणं निष्क्रियं च तिष्ठतीति नियमेन ।

**ठ. छलम्**

अन्यार्थस्याभिप्रायेण प्रयुक्तस्य वाक्यस्य पदस्य वार्थान्तरं परिकल्प्य दूषणाभिधानं छलम् । "अभिप्रायान्तरेण प्रयुक्तस्य शब्दस्याऽर्थान्तरं परिकल्प्यदूषणाभिधानं छलम्" (मिश्रः, २०६०, २१८) इति । उक्ते वाक्ये विपरीतार्थकल्पनया प्रतिवादिनो मुखस्तम्भो छलेन क्रियते । प्रथमवक्तुर्योऽभिप्रायः, तस्याभिप्रायस्य विपरीतार्थकल्पनैव छलम् । तथा च सूत्रम्- "वचनविघातोऽर्थविकल्पोपपत्त्या छलम" (न्यायसूत्रम्, १।२।१०) इति। वाक्छलम्, सामान्यच्छलम्, उपचारच्छलञ्चेति छलस्य त्रैविध्यं निर्दिष्टम्। नवकम्बलोऽयं ब्राह्मण इत्यत्र नवः कम्बलोऽस्त्यस्येति नवकम्बलः, अस्य ब्राह्मणस्य नूतनकम्बलोऽस्तीति वक्तुरभिप्रायः, परन्तु वक्तुरभिप्रायाद् नवशब्दस्य संख्यार्थं कल्पयित्वा छलवादी वाक्छलेन प्रवर्तते । सूत्रञ्च- "अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम्" (न्यायसूत्रम्, १।२।१२) इति । एवञ्च सम्भावितार्थस्य समानधर्मसम्बन्धादसम्भाव्यार्थकल्पनं सामान्यच्छलम् । ब्राह्मणोऽयं विद्याचरणसम्पन्न इत्युक्तेऽन्यः कश्चिद् वदति यत् सम्भवति ब्राह्मणे विद्याचरणसम्पदिति, परन्त्वत्र छलवाद्यर्थकल्पनेन खण्डयति । यदि ब्राह्मणे विद्याचरणसम्पत्सम्भवति चेत् व्रात्येऽपि सम्भवेत् । यतोहि सोऽपि ब्राह्मण इति सामान्यच्छलम् । उपचारच्छलन्नाम यत्र वादिना लक्ष्यार्थस्य प्रयोगः क्रियते, परन्तु प्रतिवादिना

मुख्यार्थं बोधयित्वा निषेधः क्रियते तदुपचारच्छलमिति । यथोक्तम्- "धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेध उपचारच्छलम्" (न्यायसूत्रम्, १।२।१४) इति । मुख्यार्थं गौणार्थं वा मनसि निधाय शब्दप्रयोगे कृते उद्दिष्टार्थस्य विरुद्धार्थं स्वीकृत्य तस्य निषेध उपचारच्छलेन क्रियते । मञ्चाः क्रोशन्तीतिप्रयोगे मञ्चस्थाः पुरुषाः क्रोशन्ति, न तु मञ्चाः क्रोशन्तीत्युपचारच्छलम् ।

**ड. जातिः**

साधर्म्येण वैधर्म्येण च प्रत्यवस्थानं जातिः । तदुक्तञ्च "साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः" (न्यायसूत्रम्, १।२।१८) इति । समानविरुद्धधर्मैः खण्डनं जातिरित्युच्यते । "व्याप्तिमनपेक्ष्य साधर्म्येण वैधर्म्येण वा दोषाः प्रदर्श्यन्ते तज्जातिः" (तर्कवागीशः, खैष्टाब्दम् २०१४, २६२) । उदाहरणसाधर्म्यात् साध्यसाधनं हेतुरित्यत्रोदाहरणवैधर्म्येण, एवञ्च उदाहरणवैधर्म्यात् साध्यसाधनं हेतुरित्यत्र उदाहरणवैधर्म्येण निषेधः क्रियते । तर्कभाषायान्तु दूषणासमर्थं स्वव्याघातकत्वसत्वञ्च जातिरित्युक्तम् । यथोक्तम् "असदुत्तरं जातिः "(मिश्रः, २०६०, २१९) इति । साधर्म्यवैधर्म्यसमादिभेदेन सा च जातिश्चतुर्विंशतिधा । ताश्च "साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः" (न्यायसूत्रम्, ५।१।१) इति ।

**ढ. निग्रहस्थानम्**

सत्यवस्त्वप्रतिभासः विपरीतप्रतिभासो वा पराजयहेतुः निग्रहस्थानम् । निग्रहस्थानं खलु पराजयहेतुः । वादी प्रतिवादी च यस्मिन् स्थले येन प्रतिपादनेन स्वपक्षपराजितत्वं मन्यते, तन्निग्रहस्थानमिति कथ्यते । "विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्" (न्यायसूत्रम्, १।२।१९) इति लक्षणसूत्रम् । विरुद्धज्ञानं विप्रतिपत्तिः । अप्रतिपत्तिश्चाज्ञानम् । एतदुभयं वादिनः पराजयकारणमिति । विप्रतिपद्यमानः पराजयो भवति । अप्रतिपत्तिस्त्वारम्भविषयेऽप्यप्रारम्भ इति । यतोहि स परेण स्थापितं प्रतिषेद्धुम्, परेण प्रतिषिद्धमुद्धर्तुञ्च न प्रभवतीति । विप्रतिपत्त्यप्रतिपत्त्योः विकल्पाद् निग्रहस्थानस्यापि बहुत्वं सिद्ध्यति, "प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि" (न्यायसूत्रम्, ५।२।१) इति द्वाविंशतिविधं निग्रहस्थानम् । अत्र न्यायदर्शनोक्तषोडशपदार्थानां विवेचनं कृतम् । षोडशपदार्थेषु संशयादयः पदार्था वादादिकथासु तत्त्वावधारणायोपयुक्ताः सन्ति । अतः सूत्रकारेण प्रमेयान्तर्भूता अपि पृथक् प्रस्थापिता इति विशेषतो ज्ञेयम् ।

## ७. निष्कर्षः

न्यायविद्या, आन्वीक्षिकीविद्या, तर्कशास्त्रमिति न्यायदर्शनस्यैवापरं नाम । दर्शनक्षेत्रे तन्न्यायदर्शनस्य विशिष्टस्थानं वर्तते । न्यायदर्शनस्य मुख्योद्देश्यं मोक्षप्राप्तिरेव । अपवर्गप्राप्तिनिमित्त्यर्थं

यथार्थज्ञानस्यावश्यकता वर्तते । न्यायशास्त्रे न्यायसूत्रकारेण षोडशपदार्थाः स्वीकृताः सन्ति । तन्मते प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानेन निःश्रेयसप्राप्तिर्भवति । प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थानमिति षोडशपदार्थाः । प्रमाणाद्धि प्रमेयादिपदार्थानां वस्तुतत्त्वज्ञानं भवति । अतः पदार्थेषु सर्वप्रथमं प्रमाणपदार्थस्य विवेचनमस्ति । प्रमाणेन यस्य पदार्थस्य ज्ञानं भवति, तत्प्रमेयम् । आत्मशरीरेन्द्रियादिद्वादशविधानि प्रमेयाणि सन्ति न्यायदर्शने । संशयादिपदार्थानां विशेषप्रयोजनप्रदर्शनाय ग्रन्थकारेण पृथगुपदेशः कृतः । संशयादिपदार्थानां पृथगुपदेशं विनेयं न्यायविद्याऽप्यध्यात्मविद्येव प्रतिभाति । प्रमाणैरर्थपरीक्षणं न्यायः । तत्रापि पञ्चावयववाक्यभूतस्य परार्थानुमानस्य परमन्यायत्वं भाष्यकारेणोक्तम् । अतोऽनुमानावयवभूतानां न्यायाङ्गभूतानां वा संशयादिपदार्थानां कथनं विनाङ्गीभूतस्य न्यायस्य स्वरूपं पूर्णन्न भवति । अतो न्यायस्य पूर्णतायै संशयादीनां पृथगुपदेशोऽत्यन्तमावश्यकमिति वक्तुं शक्यते । यतोहि संशयं विना न्यायो न प्रवर्तते । अनुपलब्धे निर्णीते चार्थे न्यायो न प्रवर्तते, केवलं संशयितेऽर्थे न्यायः प्रवर्तते । अन्यशाास्त्रमिव न्यायशास्त्रस्यापि प्रयोजनं विना प्रवृत्तिर्न भवति । अतः प्रयोजनज्ञानमावश्यकं तत्वज्ञानाय । परार्थानुमाने पञ्चावयववाक्येषु दृष्टान्तबोधकवाक्यमावश्यकम् । दृष्टान्तबोधकवाक्येनैव पदार्थानां सम्यग्बोधो भविष्यति । शास्त्रैः, अधिकरणैः, अभ्युपगमैः सिद्धान्तानामर्थानां सम्यग् व्यवस्था एव सिद्धान्तः । सिद्धान्तोऽयं सर्वतन्त्र-प्रतितन्त्र-अधिकरणसंस्थिति-अभ्युपगमसंस्थितिभेदेन चतुर्विधः । पञ्चावयववाक्यं हि परमो न्यायः । पञ्चावयववाक्यानामेकदेशोऽवयवः । नैयायिकैः पञ्चावयवाः स्वीक्रियन्ते । प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनेति पञ्चावयवाः । प्रमाणानामनुग्राहकस्तर्कः । प्रमाणानां साहाय्येन तत्त्वज्ञानार्थमुहस्तर्को भवति । अवयवतर्काभ्यां यः सिद्ध्यति, स निर्णयः । निर्णयस्तर्कसहकृतप्रमाणानां फलं वर्तते । तत्त्वजिज्ञासूनां गुरुशिष्याणां मध्ये जायमाना कथैव वादः । तत्त्वनिर्णये वाद एवोपयुज्यते । द्वयोर्विजिगीष्वो उभयस्थापनावती कथा जल्पः । वादकथायां यद्यपि जल्पकथायाः मुख्यप्रयोजनं विजीगीषास्ति । प्रतिपक्षस्थापनरहिता कथा वितण्डा । वैतण्डिकस्य मुख्यप्रयोजनमेव परपक्षखण्डनमस्ति । हेत्वाभासपदेन दुष्टहेतवः, एवञ्च हेतुदोषा उच्यन्ते । प्रथमवक्तुर्योऽभिप्रायः, तस्याभिप्रायस्य विपरीतार्थकल्पना छलम् । छलन्तु वाक्छलम्, सामान्यच्छलम्, उपचारच्छलञ्चेति त्रिविधम् । समानविरुद्धधर्मैः खण्डनमेव जातिः । वादी प्रतिवादी च यस्मिन् स्थले येन प्रतिपादनेन स्वपक्षपराजितत्वं मन्यते, तन्निग्रहस्थानमिति कथ्यते । षोडशपदार्थानां तत्त्वज्ञानं भविष्यति चेत्तर्हि मोक्षमार्गस्योद्घाटनमपि भविष्यति । समेषां पदार्थानां यदा यथार्थभूतं तत्त्वज्ञानं भवति तदा मिथ्याज्ञाननिवृत्तिर्भवति, तदनन्तरं क्रमेण दोषप्रवृत्तिजन्मनाश भवत्येव, तदनन्तरञ्च दुःखं नश्यति दुःखनाश एव मोक्ष इति । एवमत्रालेखे गौतमोक्तप्रमाणप्रमेयपदार्थपरिचयपुरस्सरं संशयादिपदार्थानां पृथगुद्देशस्य कारणत्वं तद्विश्लेषणञ्च कृतमिति निष्कर्षः ।

## कृतज्ञताज्ञापनम्

आलेखेऽस्मिन् न्यायदर्शनाभिमतानां संशयादिपदार्थानां विश्लेषणविषये अनुसन्धानात्मकालेखसम्बद्धप्रविध्यादि-विषये च परामर्शदातृभ्यः सर्वेभ्यो गुरूजनेभ्यो हार्दान् धन्यवादान् वितरामि ।

## सन्दर्भग्रन्थसूची

आचार्यः, प्रशस्तपादः (२०५३). *प्रशस्तपादभाष्यम्* (श्रीधरभट्टप्रणीतया न्यायकन्दलीव्याख्यया समलङ्कृतम्), वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।

उद्योतकरः, भारद्वाजः (२०६४). *न्यायवार्तिकम्,* पुनर्मुद्रितसंस्करणम्, वाराणसी : चौखम्बासंस्कृतभवनम् ।

गौतमः, (खैष्टाब्दम् १९९९). *न्यायदर्शनम्* (वात्स्यायनभाष्यसंवलितम्), सम्पा. द्वारकादासशास्त्री, वाराणसी : बौद्धभारतीप्रकाशनम् ।

तर्कवागीशः, फणिभूषणः (खैष्टाब्दम् २०१४). *न्याय-परिचयः,* पुनर्मुद्रितसंस्करणम्, वाराणसी : चौखम्बाविद्याभवनम् ।

भट्टः, अन्नम् (खैष्टाब्दम् १९८५). *तर्कसंग्रहः,* (न्यायबोधिन्याः संस्कृतहिन्दीकलाद्वयव्याख्यया पदकृत्यस्य हिन्दीटीप्पण्योपेतः) व्याख्या. केदारनाथत्रिपाठी, द्वितीयसंस्करणम् दिल्ली : मोतीलालबनारसीदासः ।

भट्टः, जयन्तः (२०७४). *न्यायमञ्जरी प्रथमो भागः* (ग्रन्थिभङ्गव्याख्ययासंवलिता), वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।

भट्टाचार्यः, विश्वनाथपञ्चाननः (२०७५). *न्यायसिद्धान्तमुक्तावली,* (किरणावलीसमाख्यव्याख्योपेता) (व्याख्याता. पं.कृष्णवल्लभाचार्यः), वाराणसी : चौखम्बासंस्कृतसंस्थानम् ।

मिश्रः, केशवः (२०६०). *तर्कभाषा* (तत्त्वालोकसंस्कृतहिन्दीव्याख्योपेता), टीका. रुद्रधरझा, चतुर्थसंस्करणम्, वाराणसी : चौखम्बासंस्कृतसीरीज आफिस ।

मिश्रः, जगदीशचन्द्रः (खैष्टाब्दम् २०१६). *भारतीय दर्शन,* वाराणसी : चौखम्भासुरभारतीप्रकाशनम् ।

मिश्रः, शङ्करः (२०६४). *वैशेषिकसूत्रोपस्कारः* (प्रकाशिका हिन्दीव्याख्योपेतः), तृतीयसंस्करणम्, वाराणसी : चौखम्भाप्रकाशनम् ।